## म

म मकारः। स तु पञ्चविंशतितमव्यञ्जनवर्णः। अस्योच्चारणस्थानमोष्ठः। इति व्याकरणम् ॥ ("उपूपध्मानीयानामोष्ठौ।" इति सिद्धान्तकौमुदी ॥) अस्य स्वरूपं यथा,—
"मकारं शृणु चार्व्वङ्गि ! स्वयं परमकुण्डली।
तरुणादित्यसङ्काशं चतुर्व्वर्गप्रदायकम् ॥
पञ्चदेवमयं वर्णं पञ्चप्राणमयं सदा।"
इति कामधेनुतन्त्रम् ॥
(वङ्गीयाक्षरैः) अस्य लेखनप्रकारः। यथा,—
"ऊर्द्ध्वाधःक्रमतो रेखा वामे वक्रा तु कुण्डली।
पुनश्चाधोगता सैव तत ऊर्द्ध्वगता पुनः।
ब्रह्मा शम्भुश्च विष्णुश्च क्रमशस्तासु तिष्ठति ॥"
अस्य ध्यानं यथा,—
"कृष्णां दशभुजां भीमां पीतलोहितलोचनाम्।
कृष्णाम्बरधरां नित्यां धर्म्मकामार्थमोक्षदाम्।
एवं ध्यात्वा मकारन्तु तन्मन्त्रं दशधा जपेत् ॥"
तत्प्रणाममन्त्रो यथा,—
"त्रिशक्तिसहितं वर्णं त्रिबिन्दुसहितं सदा।
आत्मादितत्त्वसंयुक्तं हृदिस्थं प्रणमाम्यहम् ॥"
इति वर्णोद्धारतन्त्रम् ॥
तस्य नामानि।
"मः कालो क्लेशितः कालो महाकालो
महान्तकः।
वैकुण्ठो वसुधा चन्द्रो रविः पुरुषराजकः ॥
कालभद्रो जया मेधा विश्वदा दीप्तसंज्ञकः।
जठरश्च भ्रमा मानं लक्ष्मीर्मातोग्रबन्धनौ ॥
विषं शिवो महावीरः शशिप्रभा जनेश्वरः।
प्रमत्तः प्रियस्ठ रुद्रः सर्व्वाङ्गो वह्निमण्डलम्।
मातङ्गमालिनी बिन्दुः श्रवणा भरणो
वियत् ॥"२६॥
इति तन्त्रोक्तवर्णाभिधानम् ॥

मः, पुं, (माति निर्म्मोति जगदिति। मा+कः।) शिवः। चन्द्रमाः। ब्रह्मा। इत्येकाक्षरकोषः ॥ यमः। समयः। विषम्। मधुसूदनः। इति मेदिनी। मे, १ ॥

मक, इ ङ भूषे। गतौ। इति कविकल्पद्रुमः ॥ (भ्वा०-आत्म०-सक०-सेट्।) इ मङ्क्यते। ङ मङ्कते हारो जनम्। गत्यर्थोऽप्ययमिति रामः। इति दुर्गादासः ॥

मकरः, पुं, (कृणातीति। कॄ हिंसायाम्। कॄ+अच्। ततः मनुष्याणां करः हिंसकः। यद्वा, सुखं किरतीति। सुख+कॄ+कः। उभयत्रापि पृषोदरादित्वात् साधुः। इति अमरटीकायां रघुनाथचक्रवर्त्ती।) जलजन्तुविशेषः इत्यमरः। १।१०।२०॥ (पादिनां गणान्तर्गतो जलजन्तुविशेषः।
"कुम्भीरकूर्म्मनक्राश्च गोधामकरशङ्कवः।
घण्टिकः शिशुमारश्चेत्यादयः पादिनः स्मृताः ॥"
इति भावप्रकाशस्य पूर्व्वखण्डे द्वितीये भागे। यथास्य गुणाः।
"मत्स्यानां मकरः श्रेष्ठो दीपनो वातनाशनः।
रुचिप्रदः शुक्रकरो ग्राही चोष्णविकारहा।
मूत्राश्मरीणां शमनो गुल्मातीसारनाशनः ॥"
इति हारीते प्रथमस्थाने एकादशेऽध्याये ॥) मकर इति गङ्गाया वाहनत्वेन ख्यातः। इति सारसुन्दरी। यथा। सितमकरनिषण्णां शुभ्रवर्णां त्रिनेत्रामित्यादि स्मृत्युक्तगङ्गाध्यानम् ॥ स च कामदेवस्य ध्वजचिह्नम्। मकरध्वज इत्यमरकोषदर्शनात्। मेषादिद्वादशराश्यन्तर्गतो दशमराशिः। तत्पर्य्यायः। आकोकेरः २। अस्य अधिष्ठातृदेवता मृगास्यमकरः। उत्तराषाढ़ायाः शेषपादत्रयं श्रवणासमुदायः धनिष्ठायाः पूर्व्वार्द्धं एतन्नवपादेन भवति। स च पृष्ठोदयः भूमिराशिः अर्द्धशब्दकरः दक्षिणदिक्स्वामी पिङ्गलवर्णः रूक्षः भूमिचारी शीतलस्वभावः अल्पसन्तानः अल्पस्त्रीसङ्गः वातप्रकृतिः वैश्यवर्णः श्यामाङ्गश्च। अत्र जातस्य फलम्। सदानन्दः। पितृमातृभक्तः अथवा मकरजातश्चेत् बहुविवाहः। इति जातकादयः ॥ अथ, रवियुक्तमकरजातफलम्।
"सदाटनो मित्रगणो विपन्नतां
प्रयाति नूनं धनवर्ज्जितः स्यात्।
यस्याशुधारश्मिर्मकरोपगः स्यात्
प्रसूतिकाले स तु भाग्यहीनः ॥"
अथ चन्द्रयुक्तमकरजातफलम्।
"कलितशीतभयः किल गीतवित्
तमरुषा सहितो मदनातुरः।
निजकुलोत्तमवृत्तिकरः परं
हिमकरे मकरे पुरुषो भवेत् ॥"
अथ मङ्गलयुक्तमकरजातफलम्।
"पराक्रमप्राप्तवरः प्रतिष्ठः
सदङ्गनाप्राप्तिवराङ्गनः स्यात्।
श्रिया समेतो मकरे महीजे
प्रसूतिकाले कुलपालकश्च ॥"
अथ बुधग्रहस्थितमकरजातफलम्।
"रिपुभयेन युतः कुमतिर्नरः
स्वरविहीनगरः परकर्म्मठः।
मकरगे सति शीतकरात्मजे
व्यसनतः स नतः पुरुषो भवेत् ॥"
अथ गुर्व्वाश्रितमकरजातफलम्।
"न मनोरथसिद्धिमुपैति नरो
वचसामधिपे मकरोपगते।
भवयुक् कुमतिः परकर्म्मरतो
बहुतोषयुतो मदनापहतः ॥"
अथ शुक्राश्रितमकरजातफलम्।
"अतिरतिर्जननने स्वजने कृशां
व्ययभयं कृशता बहुचिन्तया।
भृगुसुते मृगराशिगते सदा
कविजने विजनेऽपि मतिर्भवेत् ॥"
अथ शनिग्रहस्थितमकरजातफलम्।
"मकरोपगतः खलु भानुसुतः
कृपया सहितो कृपमानयुतः।
वरगन्धविभूषणभूषितगात्र-
स्तरुणीरमणः पटुजनेषु ॥"
इति कोष्ठीप्रदीपः ॥
(व्यूहभेदः। यथा, कामन्दकीये नीतिसारे। १८। ४८।
"यायाद्व्यूहेन महता मकरेण पुरो भये ॥")

मकरकुण्डलं, क्ली, (कुण्डलम् मकर इवेत्युपमितसमासः।) मकराकृतिकर्णभूषणम्। यथा,
"वनमालानिवीताङ्गो लसच्छ्रीवत्सकौस्तुभः।
महाकिरीटकटकः स्फुरन्मकरकुण्डलः ॥"
इति श्रीभागवते ६ स्कन्धे ४ अध्यायः ३७ श्लोकः ॥ स्फुरती मकरकुण्डले यस्य सः। इति तट्टीकायां श्रीधरस्वामी ॥

मकरकेतनः, पुं, (मकरेण चिह्नितं केतनं ध्वजो यस्य।) कन्दर्पः। इति मीनकेतनशब्दटीकायां भरतेन सङ्केतितम् ॥

मकरध्वजः, पुं, (मकरेण चिह्नितो ध्वजो यस्य।) कामदेवः। इत्यमरः। १।१।२७॥ (यथा, माघे। ३। ६१।
"शरीरिणा जैत्रशरेण यत्र
निःशङ्कमूषे मकरध्वजेन ॥")
रससिन्दूरविशेषः। तस्य नामान्तरं चन्द्रोदयः। तस्य करणप्रकारो यथा,—
"पलं मृदु स्वर्णदलं रसेन्द्रं
पलाष्टकं षोड़शगन्धकस्य।
शोणैः सुकार्पासभवप्रसूनैः
सर्व्वं विमर्द्याथ कुमारिकाद्भिः ॥
तत् काचकुम्भे निहितं सुगाढ़े
मृत्कर्पटैस्तद्दिवसत्रयञ्च।
पचेत् क्रमाग्नौ सिकताख्ययन्त्रे
ततो रजः पल्लवरागरम्यम् ॥
निगृह्य चैतस्य पलं पलानि
चत्वारि कर्पूररजस्तथैव।
जातीफलं शोषणमिन्द्रपुष्पं
कस्तूरिकाया इह शाण एकः ॥
चन्द्रोदयोऽयं कथितोऽस्य माषो
भुक्तोऽहिवल्लीदलमध्यवर्त्ती ॥"
अस्य गुणाः।
"मदोन्मदानां प्रमदाशतानां
गर्व्वाधिकत्वं श्लथयत्यकाण्डे।
श्लथं घनीभूतमतीव दुग्धं
मृदूनि मांसानि समस्तकानि।
मांसानि मिष्टानि भवन्ति पथ्यमानन्ददायीन्यपराणि चान्न ॥
वलीपलितनाशनस्तनुभृतां वयस्तम्भनः
समस्तगदखण्डनः प्रचुरयोगपञ्चाननः।
गृहेषु रसराड़यं भवति यस्य चन्द्रोदयः
स पञ्चशरदर्पितो मृगदृशां भवेद्वल्लभः ॥"
इन्द्रपुष्पं लवङ्गम्। उक्तपरिमाणकज्जलमुपलक्षणम्। दाक्षिणात्याः शोणकार्पासपुष्परसमेव गृह्णन्ति। पाश्चात्याः निर्द्दग्धतत्पुष्पैरेव यावदार्द्रत्वं मर्द्दयन्ति। उभयथैव निष्पत्तेरदोषः।